शृङ्गेरी-द्वारका-पुरी-ज्योतिष्पीठाचार्य-स्वीकृता शासन समता विश्वप्रिया पाक्षिक

शारदा

संपादकः पं. वसन्त अ. गाडगीळ.

वार्षिकं मूल्यम् रू. २५ ❀ अस्य अङ्कस्य रू. १-२५

स्मर्यताम् । श्रूयताम् ।। स्मर्यताम्

आ का श वा णी

डॉयशे वेले कलोन (पश्चिम जर्मनी)

प्रतिमासं द्वितीये सोमवासरे रात्रौ ९.२५ तः ९.३७

लघुलहरी ११७६५ , ११७९५ , १५३२० , १७८७५

विषयः जर्मनीदेशे विश्वे च सर्वत्र संस्कृत वार्ताः

संस्कृत-कार्यक्रम संचालिका डॉ. याज्ञसेनी पोपट

'शारदा-दैनिक-वितरण-केन्द्रम्

राजा दीक्षित वृत्तपत्रागारम्

चिपळूण (रत्नागिरी) ४१५६०५

पुणे-डेरवण (चिपळूण)
यज्ञ-महोत्सव-विशेषाङ्क-दैनिकम् ३

वर्षम् २६ अङ्कः ५

भारतीय सौर दिनाङ्कः ६ पौष १९०६
विक्रम-संवत् २०४१ गुरुवासरः २७ डिसेंबर १९८४

'यज्ञेन यज्ञमयजन्त देवाः ।'

- तानि- धर्माणि प्रथमान्यासन्

डेरवण (चिपळूण महाराष्ट्र) २७ डिसेंबर १९८४ :

'ओम् नमस्ते गणपतये । ओम् नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताय श्रीवरदमूर्तये नमः।' इति श्रीगणपत्यथर्वशीर्षपाठस्य सहस्र-ब्राह्मणैः लक्षावृत्ति जपं कृत्वा श्रीशिव समर्थ मन्दिरस्थं श्रीयज्ञनारायण-मन्दिरं श्रीगणेशमयं कृतम् । दशसु दिक्षु सर्वत्र ।। ओम् गं गणपतये नमः ।। इति श्रीगणेश मन्तर ध्वनिः प्रपूरितः सर्वान् गणेशमयान् गणराजैकनिष्ठान् समपादयत् ।

श्रीगणेशनाम्ना सहस्रावर्तनेन सह श्रीगणेशयागः सर्वत्र सुपरिचितः । परम् अथर्व-शीर्षपाठस्य लक्षावृत्ति-जपः तद्-दशांशं च हवनम् इति भव्यम् अनितर साधारणं यागानुष्ठानं साक्षात्कृत्य यावत् होम-धूम-पावितान्तः करणाः गाणपत्याः प्रकृत्या महाराष्ट्रजनाः महाराष्ट्रेतर प्रदेशेभ्यः समुपस्थिताः च वेदोनारायणाः तावदेव प्रारब्धम् अद्य अतिरुद्र-जप-स्वाहाकारस्य विराट्-स्वरुपम् अनुष्ठानम् ।

ऋग्वेदाचार्येषु सर्वोत्तमत्वेन ख्यातः घनपाठी किंजवडेकरः श्रीदत्तंभट्ट गुरुश्रेष्ठः यत्र प्रधानाचार्यः तेन ऋक् संहिता-स्वाहाकारेण व्याप्ते स्थण्डिल-द्वये वेदाचार्य-सर्वश्री आठल्ये-पाध्ये, गुळसुन्दकर फडके, पुणताम्बेकर चिन्तामणि पुरोहित भालचंद्र फणसळकर-रामभट्ट गोरे- चितळे-नवाथे-कोतवडेकर-निगुडकर घळसासी पराञ्जपे मनोहर चिन्तामणि पण्ढरपुरे गोरेदण्डगेयुव-द्वय सहितैः ऋग्वेद-स्वाध्याय-निष्ठैः ऋग्वेद-मन्तर घोषेण

सिन्धु-शुतुद्री सरस्वतीनाम् ।
तटे ऋषीणां ध्यानपराणाम् ।
होम- धूम - पावित-लोकानाम् ।
अत्रि-भृगूणां छन्दोवाणी ।।
प्रवहतात् (वैदिक) संस्कृत मन्दाकिनी ।।
इति कविवर्य डॉ. गजाननराय पळसुले विरचितम् अमर-मन्दाकिनी-गीतं स्मारितम् ।

एकतः ऋक् संहिता स्वाहाकारेण ऋषीणाम् आद्यानां सा ऋतम्भरा प्रज्ञा यावत् परिचायिता तावदेव षट्-स्थण्डिलेषु समकालं प्रारब्धम् अतिरुद्र याग हवनम् । प्रति स्थण्डिल मण्डलं विंशति ब्राह्मणाः (षट्सु आहत्य) इति प्रमाणेन एकविंशति अधिक-शतं रुद्रपाठिनां (हवन कर्मणि नियोजितानां) पाठेन सहैव पञ्चशती रुद्र-जप-पराणां यदा रौद्रं रुद्राध्याय-घोषं प्रारभत तदा स्वयं भगवान् रुद्रः समुपस्थितः श्री यज्ञमण्डपे इति समुपस्थितानां साक्षात्कारः । रुद्र-नाद-निनादिते दिगन्तराले यज्ञाग्नि नारायण शिखा प्रभया दीप्तम् इव नभोमण्डलं प्रसाद-प्रकाश-वर्षावम् अकरोत् । ध्वनि-नाद-लहरी-ज्योतिष्-प्रकाशलहरी संगमे अस्मिन् भक्ति भाव भविलान्तःकरणानां हृदय-वीणा-झङ्कृति-लहरीणां संयोगेन कश्चन अभूतपूर्वः त्रिवेणी संगमः पू. श्रीदिगम्बरदास-मुख-मण्डले यदा साक्षात्कृतः तदा धन्याः स्मः इति स्वीया जन्म-सार्थकता समुपस्थितैः अक्षरीकृता

वेदो नित्यमधीयताम्



पुण्यपत्तने ऋग्वेद-पाठशालायाम् मध्यभागे विराजते
घनपाठी किंजवडेकरगुरुश्रेष्ठः, उभयतः बटू - फडके, बोरकर

पुण्यपत्तनम् - पू. श्रीबाबामहाराज सहस्रबुद्धे- समाधि-मन्दिरे प्रतिदिनं दश-ग्रन्थ-पारायणस्य अखण्ड-परंपरया सह एव ऋग्वेद-स्वाध्याय-केंद्रं प्रारब्धं पू. श्रीदिगम्बरदासमहाराज प्रेरणा-प्रोत्साहनेन । प्रतिदिनं प्रातःकाले बटु-द्वयम् अध्याप्यते भारतख्यातेन घनपाठि- वेदाचार्य-श्रेष्ठेन किंजवडेकर दत्तात्रेयभट्टमहाभागेन । न केवलं महाराष्ट्रेषु परं भारतवर्षे वेद-विद्या-संवर्धनार्थम् आदर्शस्य अस्य स्वाध्याय-केंद्रस्य लाभेन धन्यं पुण्यं च पुण्यपत्तनं तथै । धन्या महाराष्ट्र-मण्डल-भू इति प्रशंसितं बहुधा बहुभिः ।

यज्ञ-नारायण-दर्शनम्

प्रातः ८ तः ११

सायं ४.३० तः ५.३०

इतर-समये निषिद्धः प्रवेशः

शृङ्गेरी-द्वारका-ज्योतिष्पीठाचार्य-स्वीकृता शासन-पुरकृता विश्वप्रिया

शारदा

संपादकः वसन्त अ. गाडगीळ

वर्षम् २६ अङ्क ५ सौर ६ पौष १९०६ २७. डिसेम्बर १९८४

वार्षिकं मूल्यम् रू. २५ * अस्य अङ्कस्य रू. १-२५

अगतिकाः स्मः । क्षन्तव्याः वयम् । कर्गज - मुद्रणसाहिती - मूल्यवर्धनात् नूतने षड्विंशति-(२६)-तमे (१ नोव्हेम्बर १९८४) शारदीये वर्षे

शा र दा - मू ल्य - व र्ध न म् ।

मूल्यम्	भारतवर्षे रूप्यकाणि	विदेशेषु अमेरिकन डॉलर
वार्षिकम्	२५	१०
पञ्चवार्षिकम्	१२१	५०
यावज्जीवम्	५०१	२००

।। वेदोऽखिलो धर्म-मूलम् ।।

आर्य-धर्मः सनातन-धर्मः वैदिक-धर्मः इति सर्वे समानार्थाः पर्याय-शब्दाः सन्ति । सांप्रतिके काले अयम् एव आर्य-सनातन-वैदिक-धर्मः हिन्दु-धर्मः इति सर्वत्र सर्वैः प्रचार्यते। । सिन्धु-तीर-वासेन हिन्दु-धर्मः इति संज्ञा ।

अस्माकं आर्य-सनातन-वैदिक-धर्मस्य मूलं वेद-वाङ्मयम् । ऋक्-यजुस्- साम-अथर्वण इति चतुष्टयी वेदानां तथैव आयुर्वेद-धनुर्वेद-गान्धर्व-वेद इत्यादयः उपवेदाः, ब्राह्मण-आरण्यक-शिक्षा-चतुष्टय-उपनिषदादिकं निखिलं वैदिकं वाङ्मय - सागरम् एवं 'वेद' इति शब्देन ग्राह्यं भवति । तस्मात् कश्चन ऋक्-यजुस्-सामाथर्वणेषु अन्यतमः वेदः नैव धर्मः, परं समग्रं वेद-साहित्यम् एव आर्य-सनातन-धर्मस्य मूलम् ।

वेदाः नाम विद्याः । आर्य-विद्यानां सर्वासां संग्रहः वेद-शब्देन द्योत्यते । अत एव आस्माकीनं धर्म-मूलं विद्याः । अयं धर्मः इयं विद्या इति विभजनं भारतीय-परंपरायां नैव कदापि शक्यम् । विद्या एव आस्माकीनः धर्म-प्राणाधारः । धर्मः एव अस्माकीन-विद्या-परंपरायाम् आत्मा । अतः यदा केचन सांप्रतिकाः शासकाश्च विद्या-क्षेत्रे धर्म-स्पर्शः मा अस्तु, धर्मः वैयक्तिक-जीवने तिष्ठतु, विद्या-विषयः धर्म-शून्यः संवर्धनीयः इति किमपि भ्रान्तं प्रचारयन्ति तदा तत् तेषाम् अज्ञानम् एव मन्तव्यम् । भारतीय-परंपरायां धर्मः एव विद्या । विद्या एव धर्मः । अत एव श्रीगीता कथयति 'न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।'

भारतीयैः प्रजाजनैः धर्म-रक्षणं कर्तव्यम् इत्यस्य अर्थः वेद-विद्या-रक्षण-संवर्धनं कर्तव्यम् । 'केवलं मठ-मन्दिर-वैदिक-पुरोहित-पूजक विश्वम् आश्रित्य धर्म-स्थितिः । इतरे सर्वे निधर्मिकाः, धर्मशून्याः (सेक्युलर) सन्तु' इत्यपि भ्रम-मूलः मिथ्या-प्रचारः समये सुदूरं प्रक्षेपणीयः । वेद-विद्या-रक्षणेन एव धर्म-रक्षणं, धर्म-रक्षणेन एव धर्म-क्षेत्र-भारत-राष्ट्र-रक्षणम् । धर्म-क्षेत्रं भारतं विद्या-प्रधानम् । इयं विद्या वेद-प्रधाना । वेदेषु सर्व-विद्या-सागर-संग्रहः । अतः वेदानाम् उपेक्षा एव विद्या-शून्यता अविद्यता अज्ञानालिङ्गनम् । ज्ञानेन सर्वोत्कर्षः । अज्ञानेन सर्वनाशः । ज्ञानम् एव धर्मः । तस्य प्राप्तिः वेद-रक्षणेन । तस्माद् एव धर्म-रक्षणम् । यतः – 'वेदोऽखिलो धर्ममूलम् ।'

संपूर्ण वेद हेच धर्माचे मूळ

आर्य धर्म, सनातन धर्म, वैदिक धर्म हे सर्व एकाच अर्थाचे पर्यायी शब्द आहेत. सध्या सर्वत्र याच आर्य सनातन वैदिक धर्माचा हिन्दु धर्म या नावाने सर्व प्रचार करतात. सिन्धु तीरावर रहाणारे ते हिन्दु असे नाव पडले या धर्माचे.

आमच्या आर्य सनातन वैदिक धर्माचे' मूळ आहे वेद-वाङ्मय. ऋग्वेद, यजुर्वेद, सामवेद, अथर्ववेद हे चार वेद, तसेंच आयुर्वेद, धनुर्वेद, गान्धर्ववेद वगैरे त्यांचे उपवेद., ब्राह्मण, आरण्यक, शिक्षा वगैरे चार वेदागडे., उपनिषदे' वगैरे संपूर्ण वैदिक वाङमयाचा प्रचण्ड विस्तारच 'वेद' या शब्दाने घ्यावा लागतो. म्हणूनच ऋग्वेद-यजुर्वेद-सामवेद-अथर्ववेद यांपैकी एखादाच वेद म्हणजे धर्म नव्हे तर संपूर्ण वेद-साहित्य हेच आर्य सनातन वैदिक धर्माचे मूळ आहे.

वेद म्हणजेच विद्या. सर्व आर्य-विद्यांचा संग्रहालाच वेद हा शब्द आहे. म्हणूनच आमच्या धर्माचे मूळ विद्या आहे. हा धर्म, ही विद्या अशी विभागणी करणें भारतीय परंपरेत कधीच शक्य नाही. विद्या हाच आमच्या धर्माचा प्राणाधार आहे. आणि धर्म हाच आमच्या विद्या-परंपरेचा आत्मा आहे. म्हणूनच आजचे काही तथाकथित बुद्धिवादी शहाणे व शासक शिक्षणक्षेत्राला धर्माचा विटाळ नको, धर्म ही खाजगी बाब शिक्षण क्षेत्र धर्मापासून दूर संभाळून ठेवावे असे कांहीतरी भ्रामक प्रचार करीत सुटतात तेव्हा तो त्यांचा शुद्ध अडाणीपणाच समजावा. भारतीय परंपरेत धर्म म्हणजेच विद्या आणि विद्या हाच धर्म. म्हणूनच श्रीगीता सांगते–"जगाच्या पाठीवर ज्ञानासारखे पवित्र दुसरे कांहीहि नाही."

भारतीय प्रजाजनानी धर्मरक्षण करावे याचा अर्थ वेद विद्येचे रक्षण संवर्धन करावे. धर्म म्हणजे केवळ मठ, मन्दिर, वैदिक, पुरोहित, पूजक यांनीच संभाळावा; बाकी सर्वांनीं निधार्मिक (सेक्यूलर) धर्मशून्य असावे असा भ्रामक, खोटारडा प्रचार वेळीच दूर फेकून दिला पाहिजे, वेद विद्येच्या रक्षणानेंच धर्माचें रक्षण आणि धर्माच्या रक्षणानेंच धर्मक्षेत्राचें भारत या राष्ट्राचें रक्षण हे विसरता नये. धर्मक्षेत्र भारत हे विद्याप्रधानच आहे. आणि ही विद्या वेद प्रधान आहे, वेदांत सर्व विद्यांच्या सागराचा ठेवा आहे. आणि मूणहूनच वेदांची उपेक्षा म्हणजेच विद्याशून्यता, अविद्येला म्हणजे अज्ञानाला कवटाळणें. ज्ञानानेंच सर्व प्रकारचा उत्कर्ष. अज्ञानाने तर सर्वनाश. ज्ञान हाच धर्म. आणि ते तर मिळणार वेदरक्षणानें. त्यामुळेच धर्माचे रक्षण होणार. कारण संपूर्ण वेद हेच धर्माचे मूळ आहे.

॥ श्रीः ॥

धनुर्धारि श्रीराम-मन्दिर संस्कार पाठशाला
पुणे विद्यार्थी गृह, पुणे ३०



शारदा ज्ञानपीठम्
झेलम, पत्रकारनगरम् पुणे १६



॥ अवयवदर्शि - रामरक्षा - स्तोत्रम् ॥

श्रीगणेशाय नमः ।

चरितं रघुनाथस्य शत-कोटि-प्रविस्तरम् ।
एकैकम् अक्षरं पुंसां महा-पातक-नाशनम् ॥१॥
ध्यात्वा नीलोत्पल-श्यामं रामं राजीव-लोचनम् ।
जानकी-लक्ष्मणोपेतं जटा-मुकुट-मण्डितम् ॥२॥
सासि-तूण-धनुर्बाण-पाणिं नक्तंचरान्तकम् ।
स्वलीलया जगत्-त्रातुम् आविर्भूतम् अजं विभुम् ॥३॥



बामाङ्कारूढ-सीता-मुख-
कमल-मिलल्लोचनम् ।



बाणेद् आजानु-बाहुम्,
धृत-शर-धनुषम् ।

रामरक्षां पठेत् प्राज्ञः
पापघ्नीं सर्व-कामदाम् ।
(१) शिरो मे राघवः पातु
(२) भालं दशरथात्मजः ॥४॥
कौमल्येयो (३) दृशौ पातु
विश्वामित्र-प्रियः (४) श्रुती ।
(५) घ्राणं पातु मख-त्राता
(६) मुखं सौमित्रि-वत्सलः ॥५॥
(७) जिह्वां विद्यानिधिः पातु
(८) कण्ठं भरत-वन्दितः ।
(९) स्कन्धौ दिव्यायुधः पातु
(१०) भुजौ भग्नेशकार्मुकः ॥६॥
(११) करौ सीतापतिः पातु
(१२) हृदयं जामदग्न्यजित् ।
(१३) मध्यं पातु खरध्वंसी
(१४) नाभिं जाम्बवदाश्रयः ॥७॥
सुग्रीवेशः (१५) कटी पातु
(१६) सक्थिनी हनुमत्प्रभुः ।
(१७) ऊरू रघूत्तमः पातु
रक्षःकुल-विनाशकृत् ॥८॥
(१८) जानुनी सेतुकृत् पातु
(१९) जङ्घे दशमुखान्तकः ।
(२०) पादौ बिभीषण-श्रीदः
पातु रामो (२१) ऽखिलंवपुः ॥९॥

★ अयम् अवयवः पृष्ठभागे वर्तते,
यथा अङ्गुल्या प्रदर्श्य संसूचितम् ।

लिंगम् / वचनम्	संस्कृत	मराठी-	
एक द्वि.	मूलशब्दः	प्रतिशब्दः	
न.	–	शिरस	डोकें
न.	–	भाल	कपाळ
–	स्त्री	दृश	डोळा
–	स्त्री	श्रुति	कान
न.	–	घ्राण	नाक
न.	–	मुख	तोंड
स्त्री	–	जिह्वा	जीभ
पु.	–	कण्ठ	गळा
–	पु.	स्कन्ध	खांदा
–	पु.	भुज	सबंध हात
–	पु.	कर	पंजा
न.	–	हृदय	हृदय
न.	–	मध्य	पोट
स्त्री	–	नाभि	बेंबी
–	स्त्री	कटि	कंबर
=	न.	सक्थि★	कुल्ला
–	पु.	ऊरु	मांडी
–	–	–	–
–	न.	जानु	गुडघा
–	स्त्री	जङ्घा	पोटरी
–	पु.	पाद	पाऊल
न.	–	वपुस	शरीर


१० एकवचनि-शब्दाः
११ द्विवचनि-शब्दा.

एनां रामबलोपेतां रक्षां यः सुकृती पठेत् ।
स चिरायुः सुखी पुत्री विजयी विनयी भवेत ॥ १० ॥

॥ श्रीसीता-रामचन्द्रार्पणमस्तु ॥

शारदा २६ ५ पत्रजीकृत क्रमाङ्क: पीएनमीडब्ल्यू ४ पूर्वमूल्य विना प्रेषा अनुज्ञा क्र. ७१ पुणे ३० पृथक्करणकार्यालये समर्पितम्

ओम् नमस्ते गणपतये ।



जगतीतले गणपति-भक्तेशु भारतं श्रेष्ठम् । भारते महाराष्ट्रम् । महाराष्ट्र राज्ये पुण्यपत्तनम् । पुण्यपत्तने श्रीमन्त दगडूशेठ हलवाई-सार्वजनिक गणपति-मण्डलम् । अस्मिन १९८४ गणेशोत्सवे अस्य गणेशस्य महोत्सवे पञ्च-लक्ष रुप्यक व्ययेन भव्यं जयपूर-प्रासादस्य (हवामहाल) निर्माणम् । विसर्जन शोभा यात्रार्थं लक्ष दीप प्रकाशः सुरथः । दश-लक्ष भक्तैः लक्ष-लक्ष श्रीफलानां समर्पणेन निर्मितः दर्शन-पूजनेतिहासः । सर्वोत्कृष्ट गणेशोत्सवार्थं ४०,००० रुप्यक मूल्याः पुरस्काराः समर्पिताः । समाजे दलितानां, पीडितानाम् अविकसितानाम् कृते तनूतर-विद्या-दानस्य स्वीकृता महती योजना । प्रारब्धा सिद्धता शत सांवत्सरिक महोत्सवस्य, १९९० वर्षे संकल्पितस्य । स्मर्यताम् यद् इहास्ति तदन्यत्र यत्रेहास्ति न तत् क्वचित् । आगम्यताम् * स्वागतम् * जय गजानन * जय भारत प्रतापराव गोडसे, (अध्यक्षः)

दशसु दिक्षु संस्कृतस्य लोक - प्रियता - संवर्धनार्थम्

अमेरिका-राष्ट्रे 'शारदा'-दैनिकाय शुभेच्छाः

विश्वप्रिय - विद्या - संवर्धक - ग्रन्थेषु मानदण्डः

पुणे विद्यार्थी गृह-प्रकाशनम्

१७८६, सदाशिव पेठ, पुणे ४११०३०

होमिओपाथ-औषधि-क्षेत्रे भारतवर्षे अग्रेसराः ।

रॉय ॲण्ड कम्पनी

१७६ शामलदास गान्धी मार्गः (प्रिन्सेस स्ट्रीट), मुम्बई

धर्म - प्रबोधनार्थं पुण्यत्तने भव्यं महालक्ष्मी - मन्दिरम्

लोक - प्रबोधनार्थं महाराष्ट्रेषु दैनिकादर्शः 'म हा - रा ष्ट्र'

आरोग्य - रक्षणार्थं रुग्णसेवा एव ईशसेवा'-श्रद्धया रुग्णालय-संचालनम्

कोटिशः मुद्रा-व्ययेन सर्वत्र सदा अग्रतः सरति —

बन्सीलाल रामनाथ अग्रवाल-धर्मादाय-न्यासः

२८३ बुधवार पेठ, पुण्यपत्तनम् ४११००२ दूरवाणी — ३८ ४१

अमेरिका - राष्ट्रे षष्ठ - विश्व - संस्कृत - संमेल

'शारदा' - संस्कृत - दैनिकाय

शुभेच्छाः

दि बॉम्बे बर्मा ट्रेडिङ्ग कॉर्पोरेशन लिमिटेड

९ वालेस स्ट्रीट, मुम्बई ४०० ००१

२८ सप्टेम्बर १९८४ मुम्बई - १

ए. के. हिरजी अध्यक्षः

आ का श वा णी

प्रतिदिनं प्रातः ७, सायं ६.१०

संस्कृत वार्ताः श्रूयन्ताम् ।

प्र वा चि का : विजयश्रीः इत्यादयः ।

संपादकः मुद्रकः प्रकाशकः स्वामी पं. वसन्त अनन्त गाडगोळ, बी.ए.बी.एड., साहित्य विशारद (पुणे दूरवाणी ५२१२४)
मुद्रण स्थलम शारदा मुद्रण सिद्धि मन्दिरम, पुणे १६ मे. कोकण प्रिंटर्स, चिपळूण ४१५६०५ (दूरवाणी १०१)
प्रकाशन स्थलम् श्रीशिव समर्थ मन्दिरम्, डेरवण (चिपळूण रत्नागिरी) शारदा, २ झेलम, पत्रकारनगरी, पुणे ४११ ०१६